अध्याय 1: शुचिपर्यावरणम्

विषय-सूची 10 प्रश्नावली · 48 प्रश्न

प्रश्नावली 1	एकपदेन उत्तरं लिखत	5 प्रश्न
प्रश्नावली 2	अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत	6 प्रश्न
प्रश्नावली 3	सन्धिं/सन्धिविच्छेदं कुरुत	1 प्रश्न
प्रश्नावली 4	अधोलिखितानाम् अव्ययानां सहायतया रिक्तस्थानानि पूरयत (भृशम्, यत्र, तत्र, अत्र, अपि, एव, सदा, बहिः)	7 प्रश्न
प्रश्नावली 5अ	अधोलिखितानां पदानां पर्यायपदं लिखत	6 प्रश्न
प्रश्नावली 5आ	अधोलिखितपदानां विलोमपदानि पाठात् चित्वा लिखत	6 प्रश्न
प्रश्नावली 6	उदाहरणमनुसृत्य पाठात् चित्वा च समस्तपदानि समासनाम च लिखत	6 प्रश्न
प्रश्नावली 7	रेखाङ्कित-पदमाधृत्य प्रश्ननिर्माणं कुरुत	5 प्रश्न
प्रश्नावली अन्वय	श्लोकानाम् अन्वयः	3 प्रश्न
प्रश्नावली भावार्थ	कथनानाम् भावार्थः	3 प्रश्न

प्रश्नावली 1 — एकपदेन उत्तरं लिखत

प्रश्न 1

अत्र जीवितं कीदृशं जातम्?

हल

पद्यांशे वर्णितम् अस्ति यत् अद्यत्वे प्रदूषणकारणात् अत्र जीवनं कष्टप्रदं सञ्जातम्।

उत्तर: दुर्वहम् (दुष्करम्)

प्रश्न 2

अनिशं महानगरमध्ये किं प्रचलति?

हल

महानगरमध्ये अहर्निशं लौहनिर्मितं यन्त्रचक्रं (कालायसचक्रम्) चलति।

उत्तर: कालायसचक्रम्

प्रश्न 3

कुत्सितवस्तुमिश्रितं किमस्ति?

हल

दूषितैः कुत्सितैः वस्तुभिः मिश्रितं भक्ष्यम् (भोज्यपदार्थः) अस्ति।

उत्तर: भक्ष्यम्

प्रश्न 4

अहं कस्मै जीवनं कामये?

हल

कविः मानवाय (मनुष्याय) शुद्धं जीवनम् इच्छति।

उत्तर: मानवाय

प्रश्न 5

केषां माला रमणीया?

हल

ललितलतानां (सुन्दरलतानां) माला रमणीया अस्ति।

उत्तर: ललितलतानाम्

प्रश्नावली 2 — अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत

प्रश्न 1

कविः किमर्थं प्रकृतेः शरणम् इच्छति?

हल

धरातले जीवनं दुर्वहं जातम्, अतः शुद्धपर्यावरणप्राप्त्यर्थं कविः प्रकृतेः शरणम् इच्छति।

उत्तर: धरातले दुर्वहम् जीवितं जातं अतः कविः शुद्धपर्यावरणाय प्रकृतेः शरणम् इच्छति।

प्रश्न 2

कस्मात् कारणात् महानगरेषु संसरणं कठिनं वर्तते?

हल

मार्गेषु यानानाम् अनन्ताः पङ्क्तयः सन्ति, अतः महानगरेषु गमनागमनं कठिनं वर्तते।

उत्तर: मार्गेषु यानानां अनन्ताः पङ्क्यः सन्ति अतः महानगरेषु संसरणं कठिनं वर्तते।

प्रश्न 3

अस्माकं पर्यावरणे किं किं दूषितम् अस्ति?

हल

अस्माकं पर्यावरणे वायुमण्डलं, जलं, भक्ष्यं धरातलं च दूषितम् अस्ति।

उत्तर: अस्माकं पर्यावरणे वायुमण्डलं, जलं, भक्ष्यं धरातलम् च दूषितम् अस्ति।

प्रश्न 4

कविः कुत्र सञ्चरणं कर्तुम् इच्छति?

हल

कविः नगरात् बहुदूरं ग्रामान्ते एकान्ते कान्तारे (वने) सञ्चरणं कर्तुम् इच्छति।

उत्तर: कविः नगरात् बहुदूरम् ग्रामान्ते एकान्ते कान्तारे सञ्चरणं कर्तुम् इच्छति।

प्रश्न 5

स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?

हल

स्वस्थजीवनाय खगकुलकलरव-गुञ्जिते वनदेशे शुद्धपर्यावरणे भ्रमणीयम्।

उत्तर: स्वस्थजीवनाय खगकुलकलरव-गुञ्जितवनदेशे शुद्धपर्यावरणे भ्रमणीयम्।

प्रश्न 6

अन्तिमे पद्यांशे कवेः का कामना अस्ति?

हल

अन्तिमे पद्यांशे कविः इच्छति यत् पाषाणी सभ्यता निसर्गे समाविष्टा न स्यात् मानवाय च सुन्दरं जीवनं स्यात्।

उत्तर: अन्तिमे पद्यांशे कवेः कामना अस्ति यत् पाषाणी सभ्यता निसर्गे समाविष्टा न स्यात् मानवाय च जीवनस्य कामना अस्ति।

प्रश्नावली 3 — सन्धिं/सन्धिविच्छेदं कुरुत

प्रश्न 1

सन्धिं/सन्धिविच्छेदं कुरुत

हल

सन्धिः / सन्धिविच्छेदः —

(क) प्रकृतिः + एव = प्रकृतिरेव

(ख) स्यात् + न + एव = स्यान्नैव

(ग) हि + अनन्ताः = ह्यनन्ताः

(घ) बहिः + अन्तः + जगति = बहिरन्तर्जगति

(ङ) अस्मात् + नगरात् = अस्मान्नगरात्

(च) सम् + चरणम् = सञ्चरणम्

(छ) धूमम् + मुञ्चति = धूमं मुञ्चति

उत्तर: प्रकृतिः + एव; स्यात् + न + एव; हि + अनन्ताः; बहिरन्तर्जगति; अस्मात् + नगरात्; सञ्चरणम्; धूमं मुञ्चति।

प्रश्नावली 4 — अधोलिखितानाम् अव्ययानां सहायतया रिक्तस्थानानि पूरयत (भृशम्, यत्र, तत्र, अत्र, अपि, एव, सदा, बहिः)

प्रश्न 1

इदानीं वायुमण्डलं ..... प्रदूषितमस्ति।

हल

'भृशम्' (अतीव) इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: इदानीं वायुमण्डलं भृशम् प्रदूषितमस्ति।

प्रश्न 2

..... जीवनं दुर्वहम् अस्ति।

हल

'अत्र' (अस्मिन् स्थाने) इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: अत्र जीवनं दुर्वहम् अस्ति।

प्रश्न 3

प्राकृतिक-वातावरणे क्षणं सञ्चरणम् ..... लाभदायकं भवति।

हल

'अपि' इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: प्राकृतिक-वातावरणे क्षणं सञ्चरणम् अपि लाभदायकं भवति।

प्रश्न 4

पर्यावरणस्य संरक्षणम् ..... प्रकृतेः आराधना।

हल

'एव' इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: पर्यावरणस्य संरक्षणम् एव प्रकृतेः आराधना।

प्रश्न 5

..... समयस्य सदुपयोग: करणीयः।

हल

'सदा' इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: सदा समयस्य सदुपयोगः करणीयः।

प्रश्न 6

भूकम्पित-समये ..... गमनमेव उचितं भवति।

हल

'बहिः' (बाह्यभागे) इति अव्ययेन रिक्तस्थानपूर्तिः।

उत्तर: भूकम्पित-समये बहिः गमनमेव उचितं भवति।

प्रश्न 7

..... हरीतिमा ..... शुचि पर्यावरणम्।

हल

'यत्र ... तत्र ...' इति अव्ययाभ्यां रिक्तस्थानपूर्तिः।

उत्तर: यत्र हरीतिमा तत्र शुचि पर्यावरणम्।

प्रश्नावली 5अ — अधोलिखितानां पदानां पर्यायपदं लिखत

प्रश्न 1

सलिलम् .....

हल

'सलिलम्' इत्यस्य पर्यायपदम् 'जलम्'।

उत्तर: सलिलम् – जलम्

प्रश्न 2

आम्रम् .....

हल

'आम्रम्' इत्यस्य पर्यायपदम् 'रसालम्'।

उत्तर: आम्रम् – रसालम्

प्रश्न 3

वनम् .....

हल

'वनम्' इत्यस्य पर्यायपदम् 'कान्तारम्'।

उत्तर: वनम् – कान्तारम्

प्रश्न 4

शरीरम् .....

हल

'शरीरम्' इत्यस्य पर्यायपदम् 'तनुः'।

उत्तर: शरीरम् – तनुः

प्रश्न 5

कुटिलम् .....

हल

'कुटिलम्' इत्यस्य पर्यायपदम् 'वक्रम्'।

उत्तर: कुटिलम् – वक्रम्

प्रश्न 6

पाषाणः .....

हल

'पाषाणः' इत्यस्य पर्यायपदम् 'प्रस्तरम्'।

उत्तर: पाषाणः – प्रस्तरम्

प्रश्नावली 5आ — अधोलिखितपदानां विलोमपदानि पाठात् चित्वा लिखत

प्रश्न 1

सुकरम् .....

हल

'सुकरम्' इत्यस्य विलोमपदम् 'दुर्वहम्'।

उत्तर: दुर्वहम्

प्रश्न 2

दूषितम् .....

हल

'दूषितम्' इत्यस्य विलोमपदम् 'शुद्धम्'।

उत्तर: शुद्धम्

प्रश्न 3

गृहणन्ती .....

हल

'गृह्णन्ती' इत्यस्य विलोमपदम् 'मुञ्चन्ति'।

उत्तर: मुञ्चन्ति

प्रश्न 4

निर्मलम् .....

हल

'निर्मलम्' इत्यस्य विलोमपदम् 'समलम्'।

उत्तर: समलम्

प्रश्न 5

दानवाय .....

हल

'दानवाय' इत्यस्य विलोमपदम् 'मानवाय'।

उत्तर: मानवाय

प्रश्न 6

सान्ताः .....

हल

'सान्ताः' इत्यस्य विलोमपदम् 'अनन्ताः'।

उत्तर: अनन्ताः

प्रश्नावली 6 — उदाहरणमनुसृत्य पाठात् चित्वा च समस्तपदानि समासनाम च लिखत

प्रश्न 1

हरिततरूणाम् — समासनाम लिखत

हल

'हरिततरूणाम्' = हरिताः च ते तरवः इति कर्मधारयसमासः।

उत्तर: हरिततरूणाम् — कर्मधारय

प्रश्न 2

ललितलतानाम् — समासनाम लिखत

हल

'ललितलतानाम्' = ललिताः च ताः लताः इति कर्मधारयसमासः।

उत्तर: ललितलतानाम् — कर्मधारय

प्रश्न 3

नवमालिका — समासनाम लिखत

हल

'नवमालिका' = नवा च सा मालिका इति कर्मधारयसमासः।

उत्तर: नवमालिका — कर्मधारय

प्रश्न 4

धृतसुखसन्देशम् — समासनाम लिखत

हल

'धृतसुखसन्देशम्' = धृतः सुखसन्देशः येन तत् इति बहुव्रीहिसमासः।

उत्तर: धृतसुखसन्देशम् — बहुव्रीहि

प्रश्न 5

कज्जलमलिनम् — समासनाम लिखत

हल

'कज्जलमलिनम्' = कज्जलेन मलिनम् इति कर्मधारयसमासः।

उत्तर: कज्जलमलिनम् — कर्मधारय

प्रश्न 6

दुर्दान्तदशनैः — समासनाम लिखत

हल

'दुर्दान्तदशनैः' = दुर्दान्तैः दशनैः इति कर्मधारयसमासः।

उत्तर: दुर्दान्तदशनैः — कर्मधारय

प्रश्नावली 7 — रेखाङ्कित-पदमाधृत्य प्रश्ननिर्माणं कुरुत

प्रश्न 1

शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।

हल

'कज्जलमलिनं' इति रेखाङ्कितपदं विशेषणम् अस्ति, अतः 'कीदृशं' इति प्रश्नपदेन प्रश्ननिर्माणम्।

उत्तर: शकटीयानम् कीदृशं धूमं मुञ्चति?

प्रश्न 2

उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

हल

'पक्षिणां' इति रेखाङ्कितपदम्, अतः 'केषाम्' इति प्रश्नपदेन प्रश्ननिर्माणम्।

उत्तर: उद्याने केषाम् कलरवं चेतः प्रसादयति?

प्रश्न 3

पाषाणीसभ्यतायां लतातरुगुल्माः प्रस्तरतले पिष्टाः सन्ति।

हल

'लतातरुगुल्माः' इति रेखाङ्कितपदम्, अतः 'के' इति प्रश्नपदेन प्रश्ननिर्माणम्।

उत्तर: पाषाणीसभ्यतायां के प्रस्तरतले पिष्टाः सन्ति?

प्रश्न 4

महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

हल

'महानगरेषु' इति अधिकरणपदम्, अतः 'कुत्र' इति प्रश्नपदेन प्रश्ननिर्माणम्।

उत्तर: कुत्र वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति?

प्रश्न 5

प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

हल

'प्रकृत्याः' इति रेखाङ्कितपदम्, अतः 'कस्याः' इति प्रश्नपदेन प्रश्ननिर्माणम्।

उत्तर: कस्याः सन्निधौ वास्तविकं सुखं विद्यते?

प्रश्नावली अन्वय — श्लोकानाम् अन्वयः

प्रश्न 1

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्। शुचि-पर्यावरणम्॥ महानगरमध्ये चलदनिशं कालायसचक्रम्। मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥ दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्।

हल

प्रदत्तपदैः (अनिशं, स्यात्, शोषयत्, दुर्वहम्, भ्रमति, एव, पेषयद्, दशनैः) अन्वयपूरणम्।

उत्तर: अत्र जीवितं दुर्वहम् जातम् प्रकृतिः एव शरणम्। शुचि-पर्यावरणं (भवेत्)। महानगरमध्ये अनिशं चलत् कालायसचक्रम् मनः शोषयत् तनुः पेषयद् सदा वक्रम् भ्रमति। अमुना दुर्दान्तैः दशनैः जनग्रसनम् न एव स्यात्।

प्रश्न 2

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्। वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥ यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।

हल

प्रदत्तपदैः (अनन्ताः, कठिनं, वितरन्ती, कज्जलमलिनम्) अन्वयपूरणम्।

उत्तर: शतशकटीयानम् कज्जलमलिनं धूमं मुञ्चति। ध्वानं वितरन्ती वाष्पयानमाला संधावति। हि यानानां अनन्ताः पङ्क्तयः कठिनं संसरणम्।

प्रश्न 3

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्। प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्॥ एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्॥

हल

प्रदत्तपदैः (नदी, स्यात्, प्रपश्यामि, अपि, कान्तारे, नगरात्, माम्, कञ्चित्) अन्वयपूरणम्।

उत्तर: अस्मात् नगरात् बहुदूरम् कञ्चित् कालं माम् नय। ग्रामान्ते निर्झर-नदी पयःपूरम् प्रपश्यामि। एकान्ते कान्तारे क्षणम् अपि मे सञ्चरणम् स्यात्।

प्रश्नावली भावार्थ — कथनानाम् भावार्थः

प्रश्न 1

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।

हल

प्रदत्तपदैः (शरणम्, दुष्करम्, पर्यावरणे, शुद्धम्) भावार्थपूरणम्।

उत्तर: अस्य भावः अस्ति यत् अद्यत्वे प्रदूषिते पर्यावरणे मानवाय जीवनं दुष्करम् जातम्, अतः पर्यावरणं शुद्धं स्वच्छं च करणीयं यतः प्रकृतेः शरणम् एव सुरक्षितम् आश्रयम् अस्ति।

प्रश्न 2

यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।

हल

प्रदत्तपदैः (कताराः, तीव्रगत्या, कठिनं, महानगरेषु) भावार्थपूरणम्।

उत्तर: आधुनिक युगे महानगरेषु मार्गेषु विविधयानानां कताराः धूमं मुञ्चन्ति तीव्रगत्या धावन्ति अतएव तत्र चलनं गमनं च कठिनं वर्तते।

प्रश्न 3

एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।

हल

प्रदत्तपदैः (वाञ्छति, वने, गत्वा, बहुदूरम्) भावार्थपूरणम्।

उत्तर: कविः प्रदूषितमहानगरात् बहुदूरम् गत्वा प्राकृतिकवातावरणे शान्ते एकान्ते वने चलितुम् वाञ्छति।